किरातांश्च पुलिन्दांश्च कुरून् वै भरतानपि ।
पाञ्चालकौशिकान् मत्स्यान्मागधाङ्गांस्तथैव च ॥
ब्रह्मोत्तरांश्च वङ्गांश्च तामलिप्तांस्तथैव च ।
एतान् जनपदानार्य्यान् गङ्गा तारयते शुभा ॥
ततः प्रतिहता विन्ध्ये प्रविष्टा दक्षिणोदधिम् ।
ततस्तु ह्लादिनी पुण्या प्राचीमभिमुखा ययौ ॥
प्लावयन्त्युपकांश्चैव निषादानपि सर्व्वशः ।
धीवरानृषिकांश्चैव तथा नीलमुखानपि ॥
केकरानेकवर्णांश्च किरातानपि चैव हि ।
कालन्दरान् विवर्णांश्च कुशिकान् स्वर्गभूमिकान् ॥
सा मण्डले समुद्रस्य तिरोभूत्वा तु सर्व्वशः ।
ततस्तु पावनी चैव प्राचीमेव दिशं ययौ ॥
कुपथान् प्लावयन्ती सा इन्द्रद्युम्नसरांस्यपि ।
तथा खरपदान् देशान् वेत्रशङ्कुपथानपि ॥
मध्ये चोज्जानकमरून् कुथप्रावरणानपि ।
इन्द्रद्वीपात् समुद्रं सा प्रविष्टा लवणोदधिम् ॥
ततस्तु पावनी प्रायात् प्राचीमाशां जवेन तु ।
तोमरान् प्लावयन्ती सा हंसमार्गान् सम्हुहकान् ॥
पूर्व्वान् देशांश्च सेवन्ती भित्त्वा सा बहुधा गिरिम् ।
कर्णप्रावरणान् प्राप्य गता साश्वमुखानपि ॥
सिकतापर्व्वतमरून् गत्वा विद्याधरान् ययौ ।
वामिमण्डलकोष्ठन्तु सा प्रविष्टा महत् सरः ॥
तासां नद्युपनद्यश्च शतशोऽथ सहस्रशः ।
उपगच्छन्ति ता नद्यो यतो वर्षति वासवः ॥
हेमकूटस्य पृष्ठे तु सर्पाणामुत्सवः स्मृतः ।
सरस्वती प्रभवति तस्मात् ज्योतिष्मती तु या ॥
अवगाहेतोभयतः समुद्रौ पूर्व्वपश्चिमौ ।
सरो विष्णुपदं नाम निषधे पर्व्वतोत्तमे ॥
तस्मात् द्वयं प्रभवति गन्धर्व्वी नकुला च ते ।
मेरोः पार्श्वात् प्रभवति ह्रदश्चन्द्रप्रभो महान् ॥
जम्बुश्चैव नदी पुण्या यस्यां जाम्बुनदं स्मृतम् ।
पयोदस्तु ह्रदो नीलः स शुभः पुण्डरीकवान् ॥
पुण्डरीका पयोदा च तस्माद्वे संप्रसूयते ।
सरस्तु सरसश्चैव स्मृतमुत्तरमानसम् ॥
मृग्या च मृगकान्ता च तस्माद संप्रसूयते ।
ह्रदाः कुरुषु विख्याताः पद्ममीनकुलाकुलाः ॥
नाम्ना ते विजया नाम द्वादशोदधिसन्निभाः ।
तेभ्यः शान्ता च माध्वी च द्वे नद्यौ संप्रसूयतः ॥"

इति मत्स्यपुराणे १०१ अध्यायः ॥ * ॥

अथ सिप्रादिसप्तनद्युत्पत्तिकारणम् ।
"एवं विवाह्य विधिवत् सौवर्णे मानसाचले ।
अरुन्धती वशिष्ठस्तु मोदमाप तया सह ॥
तत्र यत् पतितं तोयं मानसाचलकन्दरे ।
विवाहावभृथार्थाय शान्त्यर्थं वसुधातलम् ॥
ब्रह्मविष्णुमहादेवपाणिभिः समुदीरितम् ।
तत्तोयं सप्तधा भूत्वा पतितं मानसाचलात् ॥
हेमाद्रेः कन्दरे सानौ सरस्याञ्च पृथक् पृथक् ।
तत्तोयं पतितं सिप्रे देवभोग्ये सरोवरे ॥
तेन सिप्रा नदी जाता विष्णुना प्रेरिता क्षितिम् ।
महाकोषीप्रपाते च यद्वारि पतितन्तु तैः ॥
कौषिकी नाम सा जाता विश्वामित्रावतारिता ।
उमाक्षेत्रे यत् पतितं तोयं तेन महानदी ॥
कावेरी नाम सा जाता तदा कावेरसंस्तुता ।
महाकाखे सरःश्रेष्ठे पतितं तज्जलं गिरेः ॥
हिमाद्रेः पार्श्वभागे तु दक्षिणे शम्भुसन्निधौ ।
गोमन्ति नाम तेर्ज्जाता नदी गोमत्युदीरिता ॥
मैनाको नाम यः पुत्त्रः शैलराजस्य च प्रियः ।
यस्तु तस्मिन् समुत्पन्नो मेनकोदरतः पुरा ॥
तत्तत्र पतितं तोयं तस्माज्जाता महानदी ।
देविकाख्या महादेवप्रेरिता सागरं प्रति ॥
तत्तोयं सङ्गतं कुर्य्याद्धंसा वड़वसन्निधौ ।
तेनाभूत् सरयूर्न्नाम्ना नदी पुण्यतमा शुभा ॥
यान्यम्भांसि महापार्श्वे खाण्डवारण्यसन्निधौ ।
हिमवत्कन्दरे याम्ये इरावद्ध्रदमन्यतः ।
इरावती नाम नदी तैस्तु जाता सरिद्वरा ॥
एताः सर्व्वाः स्नानपानात् सर्द्दणैर्ज्जाह्नवी यथा ।
फलं ददति मर्त्यानां दक्षिणोदधिगाः सदा ॥
धर्म्मार्थकाममोक्षाणां बीजभूताः सनातनाः ।
महानद्यस्तु सप्तैताः सर्व्वदा देवभोगदाः ॥
एवं नद्यः सप्त जाताः सदा पुण्यतमोदकाः ।
अरुन्धत्या वशिष्ठस्य विवाहे देवसन्निधौ ॥"

इति कालिकापुराणे २३ अध्यायः ॥ * ॥

नद्यादीनां रूपद्वयं यथा,—
"नद्यश्च पर्व्वताः सर्व्वे द्विरूपाश्च स्वभावतः ।
तोयं नदीनां रूपन्तु शरीरमपरन्तथा ॥
स्थावरं पर्व्वतानान्तु रूपं कायस्तथापरः ।
शुक्तीनामथ कम्बूनां तथैवान्तर्गता तनूः ॥
बहिरस्थिस्वरूपन्तु सर्व्वदैव प्रवर्त्तते ।
एवं जलं स्थावरञ्च नदीपर्व्वतयोस्तथा ॥
अन्तर्व्वसति कायस्तु सततं नोपपद्यते ।
आप्याय्यते स्थावरेण शरीरं पर्व्वतस्य तु ॥
तथा नदीनां कायस्तु तोयेनाप्याय्यते सदा ।
नदीनां कामरूपित्वं पर्व्वतानान्तथैव च ।
जगत्स्थित्यै पुरा विष्णुः कल्पयामास यत्नतः ॥
तोयहानौ नदीदुःखं जायते सततं द्विजाः ।
विशीर्णे स्थावरे दुःखं जायते गिरिकायगम् ॥"

इति कालिकापुराणे २२ अध्यायः ॥

तस्या वैदिकपर्य्यायः । अवनयः १ यक्ष्वाः २ खाः ३ सीराः ४ स्रोत्याः ५ एन्यः ६ धुनयः ७ रुजानाः ८ वक्षणाः ९ खादोअर्णाः १० रोधचक्राः ११ हरितः १२ सरितः १३ अग्रुवः १४ नभन्वः १५ वध्वः १६ हिरण्यवर्णाः १७ रोहितः १८ सस्रुतः १९ अर्णाः २० सिन्धवः २१ कुल्याः २२ वर्य्यः २३ उर्व्व्यः २४ इरावत्यः २५ पार्वत्यः २६ स्रवन्त्यः २७ ऊर्ज्जस्वत्यः २८ पयस्वत्यः २९ सरस्वत्यः ३० तरस्वत्यः ३१ हरस्वत्यः ३२ रोधस्वत्यः ३३ भास्वत्यः ३४ अजिराः ३५ मातरः ३६ नद्यः ३७ । इति सप्तत्रिंशन्नदीनामानि । इति वेदनिघण्टौ । १ । १३ ॥ (चतुर्द्दशाक्षरवृत्तिविशेषः । तल्लक्षणं यथा,—
"ननतजगुरुगैः सप्तयतिर्नदी स्यात् ॥")

नदीकदम्बः, पुं, (नदीनां कदम्बं समूहो यत्र ।) महाश्रावणिका । इति राजनिर्घण्टः ॥ (नदीनां कदम्बम् ।) नदीसमूहे, क्ली ॥

नदीकान्तः, पुं. (नदीनां कान्तः पतिः ।) समुद्रः । (नदी कान्ता प्रिया यस्य ।) हिज्जलवृक्षः । सिन्धुवारकः । इति मेदिनी । ते, २०० ॥

नदीकान्ता, स्त्री, (नदी कान्ता यस्याः ।) जम्बुवृक्षः । काकजङ्घौषधिः । इति मेदिनी । ते, २०१ ॥ (अस्याः पर्य्यायो यथा,—
"काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा ।
पारावतपदी दासी काका चापि प्रकीर्त्तिता ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) लता । इति हेमचन्द्रः ॥

नदीकूलप्रियः, पुं, (नदीकूलं प्रियं यस्य । नदीकूलजातत्वादस्य तथात्वम् ।) जलवेतसः । इति जटाधरः ॥

नदीजं, क्ली, (नद्या जायते इति । जन+डः ।) स्रोतोऽञ्जनम् । इति हेमचन्द्रः ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"स्रोतोऽञ्जनं नदीजञ्च कृष्णं स्रोतोजलाञ्जनम् ॥")

नदीजः, पुं, (नद्या जायते इति । जन+डः ।) अर्ज्जुनवृक्षः । इति रत्नमाला ॥ (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वी धनञ्जयः पार्थो नदीजः ककुभोऽर्ज्जुनः ॥") यावनालशरः । हिज्जलवृक्षः । इति राजनिर्घण्टः ॥ (विटमाक्षिकः । इति हेमचन्द्रः । ४ । १२१ ॥ यथा, सुश्रुते उत्तरतन्त्रे । १७ ।
"नदीजशङ्खौकटुकान्ययाञ्जनं
मनःशिला द्वे च निशे यकृद्रसे ॥"
नृपतिविशेषः । यथा, महाभारते । ५ । ४ । १९ ।
"सुरारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ॥"
भीष्मः । गङ्गागर्भजातत्वात् तथात्वम् । यथा, तत्रैव । ५ । १४८ । ३२ ।
"अयन्तु धर्म्मज्ञतया महात्मा
न राज्यकामो नृवरो नदीजः ॥")

नदीजाते, त्रि ॥ (यथा, महाभारते । ७ । १०२ । ८ ।
"पार्व्वतीयैर्नदीजैश्च सैन्धवैश्च महाहयैः ॥")

नदीजा, स्त्री, (नद्या जायते या सा । जन+डः+टाप् ।) अग्निमन्थवृक्षः । इति राजनिर्घण्टः ॥

नदीतरस्थानं, क्ली, (नद्यास्तरस्थानमवतरणस्थलम् ।) घट्टः । इति भूरिप्रयोगः ॥ (नद्या इतरस्थानम् ।) नदीभिन्नस्थानम् ॥

नदीनः, पुं, (नदीनां इनः पतिः ।) समुद्रः । इति त्रिकाण्डशेषः ॥ वरुणः । यथा । अयं नदीन इत्याद्युत्तरनैषधः ॥ (अमेनोवंशीयस्य सहदेवस्य पुत्त्रः । यथा, हरिवंशे । २९ । ४ ।
"सहदेवस्य धर्म्मात्मा नदीन इति विश्रुतः ।
नदीनस्य जयत्सेनो जयत्सेनस्य सत्कृतिः ॥"
न दीनः इति नञ्समासे दरिद्रभिन्ने, त्रि ॥)

नदीनिष्पावः, पुं, (नदीसम्मुखजातो निष्पावः ।) धान्यभेदः । तत्पर्य्यायः । कटनिष्पावः २ कर्बुरः ३